*Belles-Lettre 2023, Vol. 1, pp. 84-91*

# चार्थे द्वन्द्व इति सूत्रविमर्शः

हावल-रुइदासः

**उपोद्घात**ः

प्राचीनभारतीयसभ्यतायाः संस्कृतेश्च एको विशिष्टः ग्रन्थो भवति वेदः। वेदानां वेदाङ्गत्वमपि स्वीक्रियते। तत्र व्याकरणं मुखेन सह कल्पितम् -

"छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते।
शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥" [1] इति।

एतेसु षट्सु वेदाङ्गेषु प्रधानं स्थानं भजते व्याकरणम्। व्याक्रियन्ते व्युत्पाद्यन्ते प्रकृति-प्रत्ययादिभिः शब्दा अनेनेति व्युत्पत्त्या विपूर्वकात्कृधातोः ल्युट्प्रत्ययेन व्याकरणशब्दो निष्पद्यते। व्युत्पत्तिगतोऽर्थो हि, येन शब्दो व्याकृतो भवति तदेव व्याकरणम्। व्याकरणशास्त्रमिदं शब्दानुशासनमित्युच्यते। शब्दानामनुशासनं शब्दानुशासनम्। शब्दानुशासनमित्यस्य व्याख्यानवसरे नागेशेनोद्यतटीकायां टीकितम् - "अन्वर्थत्वात् प्रयोजनाभिधानोपपत्तेः। अनुशिष्यन्ते असाधुशब्देभ्यो विविच्य ज्ञाप्यन्ते, अनेनेति करणलुडन्ततया शास्त्रपदेन सामानाधिकरण्यमिति भावः"[2] इति। अपि च तत्त्वालोककारेण निगदितं - "साधुशब्दज्ञापनाय शब्दानुशासनसंज्ञकं व्याकरणशास्त्रम्"[3] इति। शब्दसम्बन्धानुशासनम् अर्थात् शब्दस्योपदेशदानं हि व्याकरणस्य कर्त्यव्यम्। अस्य व्याकरणाध्ययनस्य आवश्यकता हि "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्"[4] इति। अर्थात् वेदरक्षणार्थं व्याकरणाध्ययनस्य आवश्यकता अस्ति। वेदस्य रक्षणे स एव समर्थः, यः व्याकरणेनैव तत् ज्ञानं लब्धुं शक्यते। अपि च महर्षिपतञ्जलिव्याकरणाध्ययनस्य त्रयोदशसंख्यकानि प्रयोजनानि उल्लिखितानि। अतएव वक्तुं शक्यते यत् संस्कृतव्याकरणस्य ज्ञानं विना शिष्टशब्दस्य प्रयोगोऽसम्भवः। इदं संस्कृतव्याकरणशास्त्रं पाणिनीयव्याकरणमपाणिनीयव्याकरणभेदेन द्विविधम्। तत्र पाणिनीयव्याकरणग्रन्थस्य आकरभूता भवति *अष्टाध्यायी*। अस्मिन् ग्रन्थे आलोचितविषयेषु समासविषयकालोचना खल्वन्यतमा।

संस्कृतव्याकरणशास्त्रे समासस्य प्रकृत संज्ञा यद्यपि न प्राप्ता तथापि समासस्य सामान्यलक्षणमिति विषये उच्यते यत् 'समसनं समासः' अर्थात् येन संक्षेपकरणं क्रियते स

.......................................................................

**शोधच्छात्रः, संस्कृतविभागः, यादवपुर-विश्वविद्यालयः**

समासः। सम्पूर्वकाद् अस्धातोः 'अकर्तरि च कारके संज्ञायाम्' इत्यनेन घञ्प्रत्ययेन कर्मणि भाववाच्ये च समासशब्दो निष्पद्यते। अस्य समासस्य स्वरूपं ज्ञातुं कानिचन सूत्राणि उपेक्ष्यन्ते। तानि हि- 'समर्थः पदविधिः' (२/१/१), 'सुवामन्त्रिते पराङ्गवत्सरे' (२/१/२), 'सह सुपा' (२/१/४), 'सुपो धातुप्रातिपदिकयोः' (२/१/७१), 'प्राक्कडारात्समासः' (२/१/३), 'कृत्तद्धितसमासाश्च' (१/२/४६) इत्यादीनि। समासोऽयं कतिविधः इत्यस्मिनविषये वैयाकरणानां मतभेदो वर्तते। साधारणतया समासश्चतुर्विधः – 'अव्ययीभावस्तत्पुरुषो बहुव्रीहिः द्वन्द्वश्चेति। केषाञ्चन मते पुन: समासः षड्विधः-

"द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारयः एव च।
पञ्चमस्तु वहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः"॥ इति

अपि च,

"द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः।
तत्पुरुष: कर्मधारय येनाहं स्यां बहुव्रीहिः ।।"[5] इति।

किन्तु विषयेऽस्मिन् भट्टोजिदीक्षितपादेन भाषितम् - "समासश्चतुर्विधः इति तु प्रायोवादः। अव्ययीभावतत्पुरुषबहुव्रीहि द्वन्द्वाधिकारबहिर्भूतानामपि सहसुपा इति समासविधानात्"[6] इति। इदानीमुपर्युक्तेषु समासभेदेषु द्वन्द्वसमासविषयकमालोचनमालोच्यते।

**द्वन्द्वसमासः**

समासभेदेषु अन्यतमोऽयं द्वन्द्वसमासः। अस्य समासस्य लोकव्यवहारः पाणिनेः प्राक्कालादेव आसीदीति विविधग्रन्थानुशीलनेन ज्ञायते। यथा, *श्रीमद्भगवद्गीतायां* विभूतिवर्णनप्रसङ्गे द्वन्द्वसमासस्योल्लेखः प्राप्यते। तत्र श्रीकृष्णेन निगदितम् – 'द्वन्द्वः सामासिकस्य च'[7] अर्थात् समासेषु द्वन्द्वो विभूतिः श्रेष्ठश्चेति। यस्मिन् समासे समस्यमानयोः द्वयोः अथवा समस्यमानानां वहूनां पदानामर्थगतं प्राधान्यं वर्तते स समासो द्वन्द्वसमासः इति। अतः कथितम् 'उभयपदार्थप्रधानो द्वन्द्वः' इति। केचित् चाहः 'सर्वपदार्थप्रधानद्वन्द्वः' इति। द्वौ च द्वौ चेति, द्वे च द्वे चेति, द्वयोः समाहारो वेति विग्रहेण निपातनात् द्वन्द्वशब्दो निष्पद्यते। अस्य द्वन्द्वशब्दस्य निर्वचनं हि- "द्वौ द्वावर्थौ अभिदधात्येकोऽस्मिन्निति द्वन्द्वः"[8] इति। अपि च "स्वघटकीभुतप्रत्येकपदार्थप्रधानकमध्यवर्त्तिविभक्तिशुन्यनामसमुदयत्वं द्वन्द्वत्वम्"[9] इति। अपि च 'पदजन्यप्रतीति विषयभेदो द्वन्द्वः'[10] इति।

भगवान् पाणिनिः द्वन्द्वसमासविधायकं सूत्रं कृतम्- 'चार्थे द्वन्द्वः'(२/२/२९) इति। तत्र 'चार्थे' इति सप्तम्येकवचनान्तं, द्वन्द्वः चेति प्रथमैकवचनान्तं पदम्। सूत्रास्यास्य वृत्तौ भट्टोजिदीक्षितेन भणितम् – 'अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते'[11] इति। अर्थात् चकार

इत्यस्यार्थे विद्यमानमनेकं सुबन्तपदस्य वैकल्पिकेन द्वन्द्वसमासो भवति। अत्र 'प्राक्कडारात्समास' इति सूत्रात् समास इति पदमनुवर्तते। द्व्यधिकपदानां मध्येऽपि समासः सम्भवतीति ज्ञापनार्थम् 'अनेकमन्यपदार्थे' इति सूत्रात् 'अनेकम्' इति पदम्, 'सुबामन्त्रिते परांगवत्स्वरे' इत्यस्मात् सुबन्तमिति पदञ्चानुवर्तते। 'विभाषा' इति सूत्रात् 'वा' इति पदं विकल्पविधानं क्रियते। अतः सूत्रस्यास्य सम्पूर्णमर्थं भवितुमर्हति - अनेकं सुबन्तं चार्थे वर्तमानं विकल्पेन समासो प्राप्नोति, स च समासः द्वन्द्वसंज्ञको भवति।

सूत्रस्थितस्य चकारस्य चत्वारः अर्थाः प्रतिपादिताः। यथा - समुच्चयः, अन्वाचयः, इतरेतरः, समाहारश्चेति। तदुक्तं भट्टोजिदीक्षितपादेन - 'समुच्चयान्वाचयेतरेतरयोगसमाहाराश्चार्थाः'[12] इति। अत: चकारास्य ये चतुर्षु अर्थेषु तेषां समुच्चयान्वाचययोः मध्ये समासो निषिद्धः, परस्परसापेक्षहीनत्वात्। *प्रयोगरत्नमालायामुच्यते*- 'समुच्चयान्वचययोर्द्वन्द्वो नास्ति' इति।[13] किन्तु इतरेतरार्थे समाहारार्थे च समासो भवितुमर्हति परस्परसापेक्षत्वात् इति। इतरेतरे समस्यमानपदानां पृथकोपलब्धि जायते। समाहारे तु मिलितार्थस्य प्राधान्यं भवति।

**समुच्चयः**

परस्परनिरपेक्षानां अनेकपदानां यत्र एकस्मिन् क्रियापदे अन्वयः भवति तत्र समुच्चयः चार्थः। तदुक्तं भट्टोजिदीक्षितेन- 'परस्परनिरपेक्षस्यानेकस्य एकस्मिन्नन्वयः समुच्चयः'[14]। अपि च *शब्दकौस्तुभ*ग्रन्थे उच्यते- "परस्परनिरपेक्षस्यानेकस्यैकस्मिन्प्रति सम्वन्धिन्यन्वयः समुच्चयः"[15] अर्थात् परस्परनिरपेक्षपदार्थानां एकस्मिन्नन्वयः समुच्चयः। यदा परस्परनिरपेक्षपदार्थाः एकस्मिन्नेव समुच्चीयन्ते तदा समासे समुच्चय इति व्यवहारो भवति। यथा- 'अहरहर्नयमानो गामश्वं पुरुषं पशुं वैवश्वतो न तृप्यति सुराया इव दुर्मदः' इत्यत्र एकस्यां नयनक्रियायां गवादीनां समुच्चयः। तस्य गम्यमानत्वादत्र च शब्दस्य अप्रयोगः। अयं समुच्चयश्चतुर्विधः। तद्यथा -

* क्रियया सह द्रव्यस्य समुच्ययः। यथा- ईश्वरं गुरुं च भजस्व।
* द्रव्येण सह द्रव्यस्य समुच्ययः। यथा - राज्ञोऽश्वः पुरुषश्च।
* द्रव्येण सह गुणस्य समुच्ययः। यथा - पटः शुक्ल रक्तश्च।
* गुणेन सह द्रव्यस्य समुच्ययः। यथा - रक्तः पटो घटश्चेति।

अत्र समुच्चयार्थे पदार्थानां परस्परनिरपेक्षत्वात् असामर्थ्यात् समासो न भवति। समुच्चयस्थलेषु आकाङ्क्षाविरहादसामर्थ्यम् अतो असामर्थ्ये समास अभावः प्रवर्तते। तद्यथा- ईश्वरं भजस्व इत्युक्ते गुरुञ्च इत्यंशस्य आकाङ्क्षा न भवति, अतोऽत्र समुच्चये समासोऽपि न प्रवर्तते।

**अन्वाचयः**

अन्यतरस्य एकस्य पदस्य यत्र अप्रधानत्वेन क्रियायामन्वयः, अन्यस्य च प्रधानत्वेन तत्र अन्वाचयः चार्थः। यथोक्तं वृत्तौ भट्टोजिदीक्षितेन - 'अन्यतरस्यानुषङ्गिकत्वेऽन्वाचयः'[16]। अर्थात् यस्मिन् वाक्ये एकस्य प्राधान्यात् तस्यैव अनुरोधेन यदा अप्रधानं इतरोऽपि अन्वाचीयते तदन्वाचयः। यथा देवदत्त! भिक्षामट गाञ्च आनय इति। अर्थात् भिक्षाकरणात् परं गवानयनरूपं कार्यं कुरु इत्येव। अत्र प्रधानाप्रधानभावः परिलक्ष्यते। यथा भिक्षामट इति प्रधानं, गवानयनरूपं कार्यञ्च अप्रधानम्। प्रधानाप्रधानयोः उभयोः देवदत्त इति पदेन सह अन्विते सत्त्वेऽपि उभयोः पदयोः परस्परसापेक्षता न दृश्यते। यदि एवमेव उक्तं भिक्षामट तर्हि अन्यपदस्य आकाङ्खाभावहेतुः परस्परनिरपेक्षत्वात् समासो न विधीयते।

**इतरेतरः**

परस्परापेक्षितानां समुदितानाम् एकस्मिन् क्रियापदे अन्वयो यत्र भवति तत्र इतरेतरयोगः भवति। भट्टोजिदीक्षितेन निगदितं - 'मिलितानामन्वये इतरेतरयोगः'[17] इति। यस्मिन् वाक्ये परस्परसापेक्षपदानि एकक्रियायां प्रधानभावेन सम्बद्धानि भवन्ति तद् इतरेतरद्वन्द्वः । अस्योदाहरणं यथा - धवश्च खदिरश्च धवखदिरौ। अत्र धवखदिरौ वृक्षौ समकाले दृष्टत्वात् भिन्नवृक्षसत्त्वेऽपि युगपत् दर्शनहेतुत्वात् उभयोः परस्परसापेक्षहेतुत्वात् इतरेतरद्वन्द्वसमासो भवति। इतरेतरयोगद्वन्द्वसमास्य वैशिष्ट्यसमूहस्तावत्-

* 'परवलिङ्गं द्वन्द्वतत्पुरुषयो:' इति सूत्रेण इतरेतरयोगद्वन्द्वसमासे परपदस्यैव लिङ्गं स्यात्। वचनं चापि समस्यमानपदानां संख्यानुसारेण भवति। यथा- कुक्कुटश्च मयूर्यौ च कुक्कुटमयूर्यौ, मयूर्यौ च कुक्कुटश्च मयूरीकुक्कुटौ इति।

* विद्यायोनिसम्बन्धवाचिनामृदन्तशब्दानां 'आनङ् ऋतो द्वन्द्वे' इत्यनेन सूत्रेण उत्तरपदपरतो द्वन्द्वसमासे आनङादेशो विधीयते। यथा – मातापितरौ, पितपुत्रौ, होतापोतारौ, याताननान्दरौ, नेष्टोद्गातारौ।

* 'देवता द्वन्द्वे च' इति सूत्रेण द्वन्द्वसमासे देवतावाचिशब्दानां पूर्वपदस्य आनङादेशो भवति। यथा – मित्रावरुणौ, इद्रावरुणौ, इन्द्रासोमौ, इन्द्रावृहस्पति इत्यादय:।

* 'ईदग्ने: सोमवरुणयो:' इत्यनेन सूत्रेण सोमवरुणशब्देन सह देवताद्वन्द्वसमासे अग्निशब्दस्य इकारो दीर्घत्वं भवति। यथा- अग्नीषोमौ।

**समाहारः**

एकीभूय क्रियायामन्वयः यत्र तत्र समाहारः चार्थः। यदुक्तं दीक्षितेन - 'समूहः समाहारः'[18] इति। अर्थात् समष्टि इत्यर्थे समाहारो भवति। तदुदाहरणं यथा - संज्ञा च परिभाषा च तयो: संज्ञापरिभाषमिति। 'संज्ञापरिभाषम्' इत्यस्मिन् पदे तिरोहितत्वात् अवयवभेदो न

अवगम्यते। अत्र संज्ञार्थस्य परिभाषार्थस्य च मिथः सापेक्षत्वं विद्यते। अस्मिन् समासे समाहारार्थकस्य समूहस्य अवयवाः अनुद्भूताः सन्तः समुच्चयात्मका भवन्ति, अस्मादेव अत्र सदैकवचनं विधीयते। समाहरणं समाहारः अर्थात् समूहः। अतः परस्परसापेक्षाणामेव अवयवभेदतिरोधानेन संहतिरूपेण अन्वये सत्येव समहारसमासः प्रतिपाद्यते। अस्य समाहारद्वन्द्वसमास्य कतिपयानि विशिष्ट्यानि सूत्राणि हि-

* **द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् (२/४/२)**– अनेन सूत्रेण एकवद्भाव: अतिदिश्यते। एकवत् नाम एकस्मिन् इव अर्थात् एकवचनान्ततया प्रयोगो भवति। तदुक्तं वृत्तौ –'एषां द्वन्द्व: एकवत् स्यात्'।[19] अर्थात् प्राण्यङ्गानां तूर्याणां सेनाङ्गानां मध्ये स्वावयवै: सह समाहारद्वन्द्वो भवति। प्राण्यङ्गस्योदाहरणं यथा - पाणी च पादौ च पाणिपादम्। तूर्याङ्गस्योदाहरणं खलु - मार्दङ्गिकाश्च पाणविकाश्च मार्दङ्गिकपाणविकम् इति। सेनाङ्गानामुदाहरणं तावत् - धनूंषि च शराश्च धनु:शरम् इति।

* **अनुवादे चराणाम् (२/४/३)** – अनुवादे गम्यमाने सति चरणशब्दानां द्वन्द्व एकवद्भवति। अनुवादो नाम प्रमाणान्तरावगतस्यार्थस्य शब्दमात्रेण सङ्कीर्तनम्। सूत्रे चरणशब्द: शाखाध्येतृषु वर्तते। अत: अस्यार्थो भवति यदा कस्यचित् शाखाविशेषा अध्येतृवाचकानां शब्दानां द्वन्द्वो विधीयते, तत्रापि अनुवादस्य प्रतीति: स्यात् तदा तत्रैकवद्भाव: सम्पद्यते। यथा - उद्गात् कठकालापम्, प्रत्यष्टात्, कठकौथुमम् इत्यादय। अनुवादेति पदग्रहणाद् उद्गु: कठकालापा: , प्रत्यष्टु:, कठकौथुमा: इत्यादौ अनुवादत्वात् अभावात् न एकवद्भाव: इति।

* **अध्वर्युक्रतुरनपुंसकम्(२/४/४)**– नपुंसकभिन्नाध्वर्युक्रतुवाचकशब्दानां द्वन्द्व एकवद्भवति। यजुषि विहितक्रतोर्विधानं नाम अध्वर्युक्रतु:। यथा – अर्कश्च अश्वमेधश्च अर्काश्वमेधम्, सायाह्नश्च अतिरात्रश्च सायाह्नातिरात्रम्। अत्र क्रतुशब्द: सोमयागेषु रूढ: तस्मादेव दर्शपौर्णमासौ इत्यत्र न एकवद्भाव:। सूत्रे अध्वर्युक्रतुरिति पदग्रहणाद् इषुवज्रौ, उद्भिद्बलभिदौ इत्यत्र नैकवद्भाव:। अनपुंसकपदेनैव विधानात् राजसूयवाजपेय इत्यादौ अपि न।

* **अध्ययनतोऽविप्रकृष्टाख्यानम् (२/४/५)** – अध्ययननिमित्तेन समीपाख्यार्थकानां शब्दानामपि द्वन्द्व एकवद्भवति। यथा – पदकाश्च क्रमकाश्च पदकक्रमकमिति। पदकक्रमपठनविषयो: सान्निध्यादत्र समाहारद्वन्द्व:, न तु अप्रयुक्तेऽध्ययने।

* **जातिरप्राणिना (२/४/६)** – प्राणिभिन्नजातिवाचकानां शब्दानां द्वन्द्व एकवद्भवति। यथा – धाना च शङ्कुलिश्च धानाशङ्कुली। अप्राणिजातिरित्यनेन द्रव्यजातिरेव बोध्यते, यथा – रूपञ्च रसश्चेति रूपरसौ। प्राणिजातौ न तु समाहार:, यथा – विटश्च शूद्राश्च विट्शूद्रा:।

**द्वन्द्वसमासे पूर्वनिपातपरनिपातयो: कतिपयानि सूत्राणि**

**राजदन्तादिषु परम् (२/२/३१)–**

सूत्रमिदं पाणिनीयं विधिसूत्रम्। सूत्रेणानेन राजदन्तादिगणपठितशब्दानां परप्रयोगो विधीयते। सूत्रेऽस्मिन् राजदन्तादिषु इति सप्तमीबहुवचनान्तं परमिति च प्रथमैकवचनान्तं पदम्। अत्र 'उपसर्जनं पूर्वम्' इति सूत्रात् उपसर्जनम् इति पदमनुवर्तते। राजदन्तः आदिः येषाम्, ते , राजदन्तादयः, तेषु राजदन्तादिषु, बहुव्रीहिसमासः। सूत्रास्यास्य वृत्तौ भट्टोजिदीक्षितेन निगदितम् – 'एषु पूर्वप्रयोगार्हं परं स्यात्' इति।[20] अर्थात् राजदन्तादिषु गणपठितेषु शब्देषु समासे पूर्वप्रयोगार्हं पदं परं भवति। सूत्रस्योदाहरणं यथा – दन्तानां राजा, राजदन्तः इति। अत्र पूर्वप्रयुक्तस्य दन्तेति पदस्य राजदन्तादिषु परम् इत्यनेन सूत्रेण परनिपातेन पदमिदं सिद्धम्।

**द्वन्द्वे घि (२/२/३२) –**

घिसंज्ञकान्तशब्दानां पूर्वनिपातार्थकमिदं सूत्रम्। अस्यार्थो घिसंज्ञकाऽन्तशब्दा पूर्वं प्रयुज्यते। यथोक्तं वृत्तौ भट्टोजिदीक्षितेन- 'पूर्वं स्यादिति'[21] । अर्थात् द्वन्द्वसमासे घिसंज्ञकं पूर्वं प्रयोज्यम्। तद्यथा – हरिश्च हरश्च हरिहरौ । उदाहरणेऽस्मिन् हरिः इति पदं हरः इति पदं उभौ प्रथमान्तत्वात् उपसर्जनसंज्ञकम् अपि च 'हरि' शब्दस्य घि संज्ञकत्वात् तस्य पूर्वनिपातो भवति। परन्तु अत्र प्रश्न जायते यत्रैकाधिकघिसंज्ञकपदानि भवन्ति तत्र कस्य पूर्वनिपात भवति? प्रत्युत्तरे वार्तिकायामुक्तम् – 'अनेकप्राप्तावेकत्र नियमोऽनियमः शेषे इति'[22] । अर्थात् अनेकस्य घिसंज्ञकपदस्य द्वन्द्वसमासे प्राप्ते सति एकस्य घिसंज्ञकस्य पदस्य पूर्वनिपात भवति। यथा - हरिश्च हरश्च गुरुश्च हरिहरगुरवः, हरिगुरुहराः, गुरुहरिहराः, गुरुहरहरयः इत्यादयो भवितुमर्हति।

**अजाद्यदन्तम् (२/२/३३) –**

सूत्रेणानेन पूर्वनिपातो विधीयते। एकपदात्मकसूत्रेऽस्मिन् 'अजाद्यदन्तम्' इति प्रथमैकवचनान्तं पदम्। अत्र 'द्वन्द्वे घि' इति सूत्रात् द्वन्द्वे इति पदम्, 'उपसर्जनं पूर्वम्' इति सूत्रात् उपसर्जनम् इति पदं चानुवर्तते। द्वन्द्वे यत् अजादि अदन्तं च तत् पूर्वं प्रयुज्यते। तदुक्तं वृत्तिकारेण- 'इदं द्वन्द्वे पूर्वं स्यादीति'।[23] यथा - ईशश्च कृष्णश्च ईशकृष्णौ। किन्तु यत्र अजाद्यदन्त-घिसंज्ञकयोरुभयोः प्राप्तिर्भवति तत्र कस्य पूर्वनिपात भवतीति समस्यायां विप्रतिषेधेन अजाद्यदन्तमिति प्रवर्तते। तद्यथा – ''द्वन्द्वे घ्यन्तादजाद्यदन्तं विप्रतिषेधेन''[24] इन्द्रश्च वायश्च इन्द्रवायू, इन्द्रश्च अग्निश्च इन्द्राग्नी इत्यादयः।

**अल्पाच्तरम् (२/२/३४) –**

सूत्रेणानेन पूर्वनिपात नियम्यते। अल्पः अच् यस्य तद् अल्पाच् इति बहुव्रीहिसमासः। अल्पाच् एव अल्पाच्तरम् इति स्वार्थे तरप्प्रत्ययः । अत एव निपातनात् कुत्वाभावः। अत एव सूत्रार्थो हि- द्वन्द्वसमासे अल्पाज्विशिष्टं पदं पूर्वं प्रयुज्यते। तद्यथा- शिवश्च केशवश्च शिवकेशवौ। अत्र अल्पाच्विशिष्टस्य 'शिव' इत्यस्य पूर्वनिपाते 'शिवकेशव' इति प्रातिपदिकात् औ-विभक्तौ विभक्तिकार्ये च 'शिवकेशवौ' इति पदं सिद्धम्।

समानाक्षराणामृतु-नक्षत्रवाचकानां शब्दानामानुपूर्व्येण पूर्वनिपातो बोध्यः।

**"ऋतुनक्षत्राणामानुपूर्व्येण समानाक्षराणां पूर्वनिपातो वक्तव्य:"**[25] तद्यथा हेमन्तशिशिरवसन्ताः। समानाक्षराणामिति विशेषणत्वाद् ग्रीष्मवसन्तौ इत्यत्र अल्पाच्त्वात् पूर्वनिपातः।

**'अभ्यर्हितम्'** [26] अभ्यर्हितं पूर्वं निपातीति वक्तव्यम्। यथा- मातापितरौ गर्भधारणादिना पित्रपेक्षया माताभ्यर्हिता।

**'लघ्वक्षरम्'** [27] लघ्वक्षरं पूर्वं निपतीति वक्तव्यम्। यथा- कुशकाशम्। भाष्येऽत्र आचार्यान्तरमतमपि दृश्यते, तद्यथा – सर्वत् एवाभ्यार्हितं पूर्वविप्रतिषेधेन पूर्वं निपतीति वक्तव्यम्, लघ्वक्षरादपीति। यथा – दीक्षातपसी, श्रद्धातपसीत्यादयः।

**'वर्णानामानुपूर्व्येण'**[28] वर्णानामानुपूर्व्येण पूर्वनिपातो भवतीति वक्तव्यम्। यथा- व्राह्मण-क्षत्रिय-विट्छुद्राः। अत्रानुपूर्व्यं नाम वेददर्शनाश्रयणोत्पत्तिक्रमेण वर्णानामानुपूर्व्यम्। तद्यथा वेद "व्राह्मणोऽस्य मुखमासीद्वाहूराजन्यः कृतः ऊरूतदस्य यद्वैश्यः पद्भ्यां शूद्रोऽजायत" इत्यादिवचनैः।

**'भ्रातुर्ज्यायस:'**[29] भ्रातुश्च ज्यायसः पूर्वनिपातो भवतीति वक्तव्यम्। यथा - युधिष्ठिरार्जुनौ।

## उपसंहृति:

नैकेषु समासभेदेषु द्वन्द्वसमासोऽन्यतम इति पूर्वमेव उल्लिखितम्। यद्यपि व्याकरणस्य ज्ञानलाभाय सर्वेषां समासानां सम्यग् ज्ञानमपिहार्य्यम्। तथापि द्वन्द्वसमासस्य प्रयोग: संस्कृतवाङ्मयेषु भूरिश: प्राप्यते । समासविषयकालोचनायां द्वन्द्वसमासविषयकानि यानि सूत्राणि प्राप्यन्ते, तै: सूत्रै: द्वन्द्वसमासस्य सम्पूर्णं ज्ञानं सम्यग्तया जातम्। अत: वक्तुं शक्यते यत् समासविभागेषु द्वन्द्वसमासः अन्यतमं स्थानं लभ्यते अलंमिति विस्तारेण।

### उल्लेखसूची


1. *पाणिनीयशिक्षा*, ४१-४२
2. पाण्डा, अशोककुमार। *वैयाकरणसिद्धान्तकौमुदि अजन्तपुंल्लिङ्गप्रकरण।* पृ.१७
3. तदेव
4. *महाभाष्यम्* (पस्पशाह्निक), सम्पा. गङ्गाधर कर। पृ.२०
5. अभियुक्तोक्ति:, शास्त्रेषु कथानकरूपेणोपलभ्यते
6. हालदार, गुरुपद, ओ तपनशङ्कर भट्टाचार्य्य। *व्याकरणदर्शनेर इतिहास।* पृष्टा १९१
7. श्रीमद्भगवद्गीता, १०/३३
8. हालदार, गुरुपद, ओ तपनशङ्कर भट्टाचार्य्य। *व्याकरणदर्शनेर इतिहास।* पृष्टा - १९७
9. तदेव
10. तदेव
11. शर्मा, गिरिधर, परमेश्वरानन्दशर्मा। *वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८३

12. तदेव
13. हालदार, गुरुपद, ओ तपनश्ङ्कर भट्टाचार्य्य। *व्याकरणदर्शनेर इतिहास।* पृष्टा – १९९
14. शर्मा, गिरिधर, परमेश्वरानन्दशर्मा। *वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८४
15. *शब्दकौस्तुभ*:
16. शर्मा, गिरिधर, *परमेश्वरानन्दशर्मा। वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८४
17. शर्मा, गिरिधर, परमेश्वरानन्दशर्मा। *वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८४
18. तदेव
19. तदेव, १८८
20. शर्मा, गिरिधर, *परमेश्वरानन्दशर्मा। वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८५
21. तदेव, पृ. १८६
22. वार्तिक, १४१०
23. शर्मा, गिरिधर, परमेश्वरानन्दशर्मा। *वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* पृ. १८६
24. वार्तिक, १४२६
25. *महाभाष्यम्*, सूत्रसंख्या, २/२/३४ . वार्तिक, १४२१
26. *महाभाष्यम्*, सूत्रसंख्या, २/२/३४ . वार्तिक, १४१२
27. *महाभाष्यम्*, सूत्रसंख्या, २/२/३४ . वार्तिक, १४१३
28. *महाभाष्यम्*, सूत्रसंख्या, २/२/३४ . वार्तिक, १४१५
29. *महाभाष्यम्*, सूत्रसंख्या, २/२/३४ . वार्तिक, १६१६

**ग्रन्थपञ्जी**


१. गोस्वामी, विश्वरञ्जन। *वैयाकरणसिद्धान्तकौमुदी समासप्रकरणम्।* कलकाता: संस्कृत वुक डिपो, २०१६

२. भट्टाचार्य्य, तपनशङ्कर। *वैयाकरणसिद्धान्तकौमुद्याः समासप्रकरणम्* (द्वितीय भाग)। कलकाता: तैलोक्यनाथ-चतुष्पाठी, २०१९

३. चक्रवर्ती, तारापद। *संस्कृत व्याकरणशास्त्रेर इतिहास।* वर्धमान विश्वविद्यालयः डाइरेक्टर डिस्ट्यान्स एडुकेशन,२००८

४. हालदार, गुरुपद, ओ तपनश्ङ्कर भट्टाचार्य्य। *व्याकरणदर्शनेर इतिहास।* कलकाता: संस्कृत वुक डिपो ,२००६

५. पाण्डे, गोपालदत्त। *वैयाकरणसिद्धान्तकौमुदी। वाराणसी*: चौखम्बा सुरभारती प्रकाशन।

६. शर्मा, गिरिधर, परमेश्वरानन्दशर्मा। *वैयाकरणसिद्धान्तकौमुदी समासप्रभृतितद्धितप्रकरणान्ता।* दिल्लीः एमएलविडि, २०१७

७. पाण्डा, अशोककुमार। *वैयाकरणसिद्धान्तकौमुदि अजन्तपुंल्लिङ्गप्रकरण।* प्रग्रेसिभ पावलिशार्स, २०१२

८. *महाभाष्यम्* (पस्पशाह्निक)। गङ्गाधर कर। कलकाताः संस्कृत वुक डिपो, २००२